# बिलस्य वाणी न कदापि मे श्रुता

**प्रश्नः 1. उच्चारणं कुरुत**–(उच्चारण कीजिए–)

| | | |
|---|---|---|
| कस्मिंश्चित् | विचिन्त्य | साध्विदम् |
| क्षुधार्तः | एतच्छ्रुत्वा | भयसन्त्रस्तमनसाम् |
| सिंहपदपद्धतिः | समाह्वानम् | प्रतिध्वनिः |

**उत्तरम्**– विद्यार्थी स्वयं उच्चारण करें।

**प्रश्नः 2. एकपदेन उत्तरं लिखत**–(एक पद में उत्तर लिखिए–)

(क) सिंहस्य नाम किम्?
(ख) गुहायाः स्वामी कः आसीत्?
(ग) सिंहः कस्मिन् समये गुहायाः समीपे आगतः?
(घ) हस्तपादादिकाः क्रियाः केषां न प्रवर्तन्ते?
(ङ) गुहा केन प्रतिध्वनिता?

**उत्तरम्**– (क) खरनखरः, (ख) दधिपुच्छः, (ग) सूर्यास्तसमये, (घ) भयसंत्रस्तमनसाम्, (ङ) उच्चगर्जनेन।

**प्रश्नः 3. मञ्जूषातः अव्ययपदं चित्वा वाक्यानि पूरयत**–(मञ्जूषा से अव्यय शब्दों को चुनकर वाक्य पूरे कीजिए–)

| | | | | | |
|---|---|---|---|---|---|
| सदा | बहिः | दूरं | तावत् | तर्हि | तदा |

(क) यदा दशवादनं भवति ...................... छात्राः विद्यालयं गच्छन्ति।
(ख) सूर्यः पूर्वदिशायां ...................... उदेति।
(ग) शृगालः गुहायाः ...................... आसीत्।
(घ) स च यावत् पश्यति, ...................... सिंहपदपद्धतिः गुहायां प्रविष्टा दृश्यते।
(ङ) शृगालोऽपि ततः ...................... पलायमानः अपठत्।
(च) यदि सफलताम् इच्छसि ...................... आलस्यं त्यज।

**उत्तरम्**– (क) **तदा**
(ख) **सदा**
(ग) **बहिः**
(घ) **तावत्**
(ङ) **दूरं**
(च) **तर्हि**

**प्रश्नः 4. पूर्णवाक्येन उत्तरत**–(पूर्ण वाक्य में उत्तर दीजिए–)

(क) खरनखरः कुत्र प्रतिवसति स्म?
(ख) महतीं गुहां दृष्ट्वा सिंहः किम् अचिन्तयत्?
(ग) शृगालः किम् अचिन्तयत्?
(घ) शृगालः कुत्र पलायितः?
(ङ) किं विचार्य सिंहः शृगालस्य आह्वानमकरोत्?
(च) अस्यां कथायां कस्य चातुर्यं निरूपितं सिंहस्य शृगालस्य वा?

**उत्तरम्**– (क) खरनखरः कस्मिंश्चित् वने प्रतिवसति स्म।
(ख) महतीं गुहां दृष्ट्वा सिंहः अचिन्तयत्–"नूनम् एतस्यां गुहायां रात्रौ कोऽपि जीवः आगच्छति। अतः अत्रैव निगूढो भूत्वा तिष्ठामि" इति।
(ग) शृगालः अचिन्तयत्–"अहो विनष्टोऽस्मि। नूनम् अस्मिन् बिले सिंहः अस्ति इति तर्कयामि। तत् किं करवाणि?"

(घ) शृगालः दूरं पलायितः।

(ङ) मम आह्वानं श्रुत्वा सः बिले प्रविश्य मे भोज्यं भविष्यति इति विचार्य सिंहःशृगालस्य आह्वानम् अकरोत्।

(च) अस्यां कथायां शृगालस्य चातुर्यं निरुपितम्।

**प्रश्नः 5. मञ्जूषातः अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत**–(मञ्जूषा से अव्यय पदों को चुनकर रिक्त स्थानों की पूर्ति कीजिए–)

| सहसा, दूरे, क्रमशः, यदा, तदा, परन्तु, यदि, तर्हि, तत्र |
|---|

एकस्मिन् वने कश्चन व्याधः जालं विस्तीर्य..................स्थितः। ..................आकाशे सपरिवारः कपोतराजः चित्रग्रीवः निर्गतः। ..................तण्डुलकणानामुपरि कपोतानां लोभो जातः। ..................राजा तत्र सहमतः नासीत्। तस्य युक्तिः आसीत्..................निर्जने वने कोऽपि मनुष्यो नास्ति..................कुतो वा तण्डुलकणानां सम्भवः? ..................राज्ञः उपदेशमस्वीकृत्य ते नीचैः आगता, ..................जाले निपतिताः। अतः उक्तम् '..................विदधीत न क्रियाम्'।

**उत्तरम्–** दूरे, तत्र, क्रमशः, परन्तु, यदि, तर्हि, यदा, तदा, सहसा।

**प्रश्नः 6. घटनाक्रमानुसारं वाक्यानि लिखत**–(वाक्यों को घटना के क्रम अनुसार लिखिए–)

(क) गुहायाः स्वामी दधिपुच्छः नाम शृगालः समागच्छत्।

(ख) सिंहः एकां महतीं गुहाम् अपश्यत्।

(ग) परिभ्रमन् सिंहः क्षुधार्तो जातः।

(घ) दूरस्थः शृगालः रवं कर्तुमारब्धः।

(ङ) सिंहः शृगालस्य आह्वानमकरोत्।

(च) दूरं पलायमानः शृगालः श्लोकमपठत्।

(छ) गुहायां कोऽपि अस्ति इति शृगालस्य विचारः।

**उत्तरम्–** (क) परिभ्रमन् सिंहः क्षुधार्तो जातः।

(ख) सिंहः एकां महतीं गुहाम् अपश्यत्।

(ग) गुहायाः स्वामी दधिपुच्छः नाम शृगालः समागच्छत्।

(घ) गुहायां कोऽपि अस्ति इति शृगालस्य विचारः।

(ङ) दूरस्थः शृगालः रवं कर्तुमारब्धः।

(च) सिंहः शृगालस्य आह्वानमकरोत्।

(छ) दूरं पलायमानः शृगालः श्लोकमपठत्।

## अतिरिक्तः अभ्यासः

**(1) पाठांशम् पठत अधोदत्तान् प्रश्नान् च उत्तरत**–(पाठांश पढ़िए और निम्नलिखित प्रश्नों के उत्तर दीजिए।)

कस्मिंश्चित् वने खरनखरः नाम सिंहः प्रतिवसति स्म। सः कदाचित् इतस्ततः परिभ्रमन् क्षुधार्तः न किञ्चिदपि आहारं प्राप्तवान्। ततः सूर्यास्तसमये एकां महतीं गुहां दृष्ट्वा सः अचिन्तयत्–"नूनम् एतस्यां गुहायां रात्रौ कोऽपि जीवः आगच्छति। अतः अत्रैव निगूढो भूत्वा तिष्ठामि" इति।

**I. एकपदेन उत्तरत।**

1. खरनखरः कः आसीत्?____________ 2. सः कुत्र वसति स्म?____________

3. सः कीदृशः इतः ततः अभ्रमत्?____________

4. सः कदा गुहाम् अपश्यत्?

**II. पूर्णवाक्येन उत्तरत।**

1. गुहां दृष्ट्वा सिंहः किम् अचिन्तयत्?

2. एतत् विचिन्त्य सः किम् अकरोत्?

**III. भाषिककार्यम्**

**(क) 'एतस्यां गुहायां कोऽपि जीवः आगच्छति' इति वाक्ये–**

1. आगच्छति क्रियापदस्य कः कर्त्ता?——

2. 'एतस्यां गुहायाम्' __________ अत्र किं विशेषणपदम्?__________

3. वाक्ये किम् अव्यय पदम् प्रयुक्तम्?__________

4. 'रात्रौ'__________अत्र किं विभक्ति वचनम्?__________

**(ख) यथानिर्देशम् रिक्तस्थानानि पूरयत–**

1. एतस्याम् __________ (द्विव.) __________ (ब. व.)

2. गुहायाम् __________ (द्विव.) __________ (ब. व.)

3. दृष्ट्वा __________ धातुः __________ प्रत्ययः

**(ग) सन्धिविच्छेदं कुरुत।**

1. क्षुधार्तः = _______ + _______ 2. अत्रैव = _______ + _______

**उत्तरम्–**

**I.** 1. सिंह: 2. वने 3. क्षुधार्त: 4. सूर्यास्तसमये

**II.** 1. नूनम् एतस्यां गुहायां रात्रौ कोऽपि जीव: आगच्छति।
2. स: तत्रैव गुहायां निगूढ: भूत्वा अतिष्ठत।

**III.** (क) 1. जीव: 2. एतस्याम 3. अपि 4. सप्तमी एकवचनम्
(ख) 1. एतयो:, एतासाम् 2. गुहयो:, गुहासु 3. दृश्+क्त्वा
(ग) 1. क्षुधा+आर्त: 2. अत्र+एव

**(2) मञ्जूषात: समानार्थकम् पदम् आदाय रिक्तस्थानानि पूरयत–**(मञ्जूषा से समानार्थक पद लेकर रिक्त स्थान भरिए–)

**कम्पनम्, आकारयिष्यसि, शब्दम्, विशालाम्, एवम् बुभुक्षित: गमिष्यामि**

1. महतीम् __________
2. क्षुधार्त: __________
3. यास्यामि __________
4. वेपथु: __________
5. रवम् __________
6. आह्वयसि __________
7. इत्थम् __________

**उत्तरम्–** 1. विशालाम् 2. बुभुक्षित: 3. गमिष्यामि 4. कम्पनम्
5. शब्दम् 6. आकारयिष्यसि 7. एवम्

**(3) शुद्धस्य कथनस्य समक्षम् 'आम्' अशुद्धस्य च समक्षम् 'न' इति लखित।**

1. दधिपुच्छ: सिंहपदपद्धतिं पश्यति।
2. स: तर्कयति यत् सिंह: गुहाया: बहि: गत:।
3. स: सिंहस्य आह्वानं करोति।
4. स: गुहायां प्रविशति।
5. सिंह: उच्चै: गर्जति।
6. तस्य उच्चगर्जन-ध्वनिना पशव: प्रसन्ना:।
7. श्रृगालेन बिलस्य वाणी पूर्वमपि श्रुता आसीत्।
8. य: अनागतम् करोति स: शोभते।

**उत्तरम्–** 1. आम् 2. न 3. न 4. न
5. आम् 6. न 7. न 8. आम्

**(4) पूर्णवाक्येन उत्तरत–**(पूर्ण वाक्य में उत्तर दीजिए–)

1. दधिपुच्छ: कथं तर्कयाति यत् सिंह: गुहायां स्थित: अस्ति?
2. दधिपुच्छस्य शब्दं श्रुत्वा सिंह: किम् अचिन्तयत्?
3. किम् विचार्य सिंह: सहसा श्रृगालस्य आह्वानम् अकरोत्?
4. सिंहस्य उच्चगर्जनेन किम् अभवत्?

**उत्तरम्–** 1. सिंहपदपद्धति: गुहायां प्रविष्टा अस्ति परं बहि: न आगता-एतत् दृष्ट्वा स: तर्कयति यत् सिंह: गुहायाम् एव अस्ति।
2. दधिपुच्छस्य शब्द श्रुत्वा सिंह: अचिन्तयत्–'नूनमेषा गुहा स्वामिन: सदा आह्वानं करोति।
3. श्रृगाल: बिले प्रविश्य मे भोज्यं भविष्यति इति विचार्य स: तस्य आह्वानाम् अकरोत्।
4. सिंहस्य उच्चगर्जनेन अन्ये पशव: भयभीता: अभवन्; श्रृगाल: अपि दूरं पलायित:।

**(5) मञ्जूषात: उचितम् अव्ययं चित्वा पाठांशं पूरयत–**(मञ्जूषा से उचित अव्यय चुनकर पाठांश को पूरा कीजिए–)

'__________अस्मिन् बिले सिंह अस्ति इति तर्कयामि। तत् किं करवाणि?'__________विचिन्त्य स: दूरस्थ: रवं कतुमारब्ध:।' भो बिल! भो बिल! किं न स्मरसि यन्मया त्वया__________समय: कृतोऽस्ति यत्__________अहं बाह्यत: प्रत्यागमिष्यामि__________त्वं माम् आकारयिष्यसि। __________त्वं मां न आह्वयसि__________अहं द्वितीयं बिलं यास्यामि।

| यदि, तर्हि, यदा, तदा, नूनम् सह एवं |
|---|

**उत्तरम्–** 'नूनम्, एवम्, सह, यदा, तदा, यदि, तर्हि।

**(6) अधोदत्तानि वाक्यानि कथायाः घनाक्रमेण योजयित्वा पुनः लिखत।** (निम्नलिखित वाक्यों को कथा के घटनाक्रम के अनुसार लगाकर पुनः लिखिए–)

1. सः गुहायां निगूढो भूत्वा अतिष्ठत्।
2. सः उच्चैः वदति–'हे बिल! यदि त्वं मां न आह्वयसि तर्हि अहं द्वितीयं बिलं यास्यामि।'
3. सिंहस्य उच्चगर्जन–प्रतिध्वनिना सर्वे पशवः भयभीताः अभवन्।
4. सः चिन्तयति–'नूनम् सिंहः बिलस्य अन्तः स्थितः! किं करवाणि?
5. श्रृगालः आगत्य पश्यति–सिंह पदपद्धतिः गुहायां प्रविष्टा।
6. क्षुधार्तः सः इतः ततः भ्रमति सूर्यास्तसमये च एकां गुहाम् पश्यति।
7. कस्मिंश्चित् वने एकः सिंह वसति स्म।
8. कदाचिद् भयात् बिलं न वदति इति विचार्य सिंहःश्रृगालस्य आह्वानम् अकरोत्।

**उत्तरम्–** 1. कस्मिंश्चित् वने एक सिंहः वसति स्म।
2. क्षुधार्तः सः इतः ततः भ्रमति सूर्यास्तसमये च एकां गुहां पश्यति।
3. सः गुहायां निगूढो भूत्वा अतिष्ठत्।
4. श्रृगालः आगत्य पश्यति–सिहपदपद्धतिः गुहायां प्रविष्टा।
5. सः चिन्तयति–'नूनम् सिंहः बिलस्य अन्तः स्थितः। किं करवाणि?
6. सः उच्चै वदित–'हे बिल! यदि त्वं मां न आह्वयसि तर्हि अहम् द्वितीयं बिलं यास्यामि।'
7. कदाचित् भयात् बिलं न वदति इति विचार्य सिंहः श्रृंगालस्य आह्वानम् अकरोत्।
8. सिंहस्य उच्चगर्जन–प्रतिध्वनिना सर्वे पशवः भयभीताः अभवन्।

## बहुविकल्पीयप्रश्नाः

**(1) प्रदत्तविकल्पेभ्यः शुद्धं पदं चित्वा एकपदेन प्रश्नान् उत्तरत–**(दिए गए विकल्पों में से शुद्ध उत्तकर चुनकर एक पद में प्रश्नों के उत्तर दीजिए–)

1. श्रृगालः रात्रै कुत्र वसति स्म?______(वने, बिले, गृहे)
2. सिंहः गुहायां कदा आगच्छति?______(सहसा, सूर्यास्तसमये, मध्याह्ने)
3. कः अचिन्तयत्– ______'अहो विनष्टोऽस्मि।'______(सिंहः, दधिपुच्छः, स्वामी)
4. गुहायाः स्वामी कः?______(श्रृगालः, सिंहः, मृगः)
5. श्रृगालः कीदृशः आसीत?______(चतुरः, भयभीतः क्षुधार्तः)

**उत्तरम्–** 1. बिले 2. सूर्यास्तसमये 3. दधिपुच्छः 4. श्रृगालः 5. चतुरः

**(2) उचितं पदं चित्वा रिक्तस्थानपूर्तिं कुरुत–**(उचित पद चुनकर रिक्त स्थान पूर्ति कीजिए–)

1. बिलस्य __________ न कदापि मे श्रुता। (ध्वनिः, जरा, वाणी)
2. इत्थं विचार्य सः श्रृगालस्य __________ अकरोत्। (भोजनम्, समयम् आह्वानम्)
3. यः __________ सः शोभते। (आगतम्, अनागतम्, आह्वानम्)
4. सिंहः गुहायां __________ भूत्वा अतिष्ठत्। (दूरस्थः, भयभीतः, निगूढ़ः)
5. अन्येऽपि पशवः __________ अभवन्। (विनष्टाः, पलायमानाः, भयभीताः)

**उत्तरम्–** 1. वाणी 2. आह्वानम् 3. अनागतम् 4. निगूढ़ः
5. भयभीताः

**(3) श्लोकांशस्य शुद्ध भावं चिनुत–**(श्लोकांश का शुद्धभाव चुनिए–)

**अनागतं यः कुरुते स शोभते**
**स शोच्यते यो न करोत्यनागतम।**

1. बुद्धिमान् सदा कार्यस्य भविष्यमालिक–परिणामम् एवं चिन्तयेत्।
2. अद्यतनस्य कार्यस्य कः परिणामः भविष्यति इति अविचार्य कार्यम् कुर्यात्।
3. यः नर भविष्यकालिकं परिणामं सुविचार्य तदनुसारं कार्ययोजनां रचयति सः कदापि संतापं न गच्छति।

**उत्तरम्–** यः नरः भविष्यकालिकं परिणामं सुविचार्य कार्ययोजनां रचयति सः कदापि संतापं न गच्छति।